# Navgrah Kavach And Mantra

## नवग्रह कवच, मंत्र, मातृका मंत्र एवं गायत्री मंत्र



**Gurudev Raj Verma**

**Contact-** +91-9897507933, +91-7500292413(WhatsApp No.)

**Email-** mahakalshakti@gmail.com

**For more info visit---**

www.scribd.com/mahakalshakti

www.gurudevrajverma.com

बृहस्पति संहिता में बृहस्पतिजी ग्रहों की महिमा के विषय में कहते हैं कि 'यह सम्पूर्ण संसार ग्रहों के अधीन है, सभी श्रेष्ठजन भी ग्रहों के अधीन होते हैं, कालतत्त्व का ज्ञान भी ग्रहों के अधीन ही है और ग्रह ही कर्मों का फल देने वाले होते हैं। सृष्टि, पालन और संहार– यह सब ग्रहों के अधीन है, कर्मों के फलदाता ग्रह ही हैं और कर्मफलों के सूचक भी ग्रह ही होते हैं, अशुभ संयोग भी ग्रहों के अनुसार ही प्राप्त होता है और उन अशुभ संयोगों को दूर करने में ग्रह ही सहायक होते हैं। अतः उन ग्रहों की उपासना द्वारा उन्हें प्रसन्न करना चाहिये।'

अथर्वज्योतिष में बताया गया है कि 'व्रत एवं उपवास करने से, गौओं के दान से, ऋषियों के लिये तर्पण करने से तथा विद्वान ब्राह्मणों को संतुष्ट करने से ग्रहनक्षत्रों द्वारा उत्पन्न होने वाले दोष शांत हो जाते हैं।' ग्रहनक्षत्र प्रत्येक जीव के शुभाशुभ कर्मों का समयानुसार फल प्रदान करने वाले ईश्वर के सहायक अंग माने जाते हैं। सम्पूर्ण सृष्टि में कोई भी जीव नवग्रहों के प्रभाव से मुक्त नहीं हो सकता है। इसलिये बुद्धिमान मनुष्य को स्वकल्याण हेतु अपने इष्टदेवता की उपासना के साथ कुण्डली में

अशुभ ग्रहों की शांति हेतु जप, व्रत एवं दान कर्म अवश्य रूप से करने चाहिये। जो व्यक्ति ग्रहनक्षत्र, देवता, पितर और ब्राह्मणों की पूजा करता है, संसार में उसकी भी पूजा होती है और जो इनका अपमान करता है तो ये उसके लिये अनिष्टकारी बन जाते हैं।

## श्रीनवग्रह कवचम्

**त्रैलोक्यमंगल श्रीसूर्यकवचम्- सूर्य उवाच-** साम्ब साम्ब महाबाहो श्रृणु मे कवचं शुभम्। त्रैलोक्य मंगलं नाम कवचं परमाद्भुतम्।1।

यज्ज्ञात्वा मंत्रवित्सम्यक् फलमाप्नोति निश्चितम्। यद्धृत्वा च महादेवो गणानामधिपोऽभवत्।2।

पाठनाद् धारणाद् विष्णुः सर्वेषां पालकः सदा। एवमिंद्रादयः सर्वे सर्वैश्वर्यमवाप्नुयुः।3।

**विनियोगः-** ॐ अस्य श्रीसूर्यकवचस्य श्रीब्रह्मा ऋषिः, अनुष्टुप् छन्दः, श्रीसूर्यः देवताः, आरोग्य यशो मोक्षार्थे पाठे विनियोगः।

ऋष्यादिन्यास- श्रीब्रह्मा ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। श्रीसूर्य देवतायै नमः हृदि। आरोग्य यश मोक्षार्थ्ये पाठे विनियोगाय नमः सर्वांगे।

ध्यानम्- रक्ताम्बुजासनमशेष गुणैकसिंधुम् भानुं समस्त जनतामधिपं भजामि। पद्मद्वयाभयवरान् दधतं कराब्जैर्माणिक्य मौलिमरुणांगरुचिं त्रिनेत्रम्।।

कवचम्- प्रणवो मे शिरः पातु घृणिर्मे पातु भालकम्। सूर्य्योऽव्यान्नयन द्वंदमादित्यः कर्णयुग्मकम्1।

अष्टाक्षरो महामंत्रः सर्वाभीष्टफलप्रदः। ह्रीं बीजं मे शिखां पातु हृदये भुवनेश्वरः।2।

चन्द्रबीजं विसर्गाढ्यं पातु मे गुह्यदेशकम्। त्र्यक्षरोऽसौ महामंत्र सर्वतंत्रेषु गोपितः।3।

शिवो वह्नि समायुक्तो वामाक्षि बिन्दु भूषितः। एकाक्षरो महामंत्र श्रीसूर्यस्य प्रकीर्तितः।4।

गुह्याद गुह्यतरो मंत्रो वांछाचिंतामणिः स्मृतः। शीर्षादि पादपर्यन्तं सदापातु मनूत्तमम्।5।

इति ते कथितं दिव्यं त्रिषु लोकेषु दुर्लभम्। श्रीप्रदं कांतिदं नित्यं धनारोग्यविवर्धनम्।6।

कुष्ठादिरोगशमनं महाव्याधि विनाशनम्। त्रिसंध्यं यः पठेन्नित्यमरोगी बलवान्भवेत्।7।

बहुना किमिहोक्तेन यद्यन्मनसि वर्तते। तत्तत्सर्व भवत्येव कवचस्य च धारणात्।8।

भूतप्रेत पिशाचाश्च यक्ष गंधर्व राक्षसाः। ब्रह्मराक्षस वेताला नैव द्रष्टुमपि क्षमाः।9।

दूरादेव पलायंते तस्य संकीर्तनादपि। भूर्जपत्रे समालिख्य रोचनागुरु कुंकुमैः।10।

रविवारे च संक्रांत्यां सप्तम्यां च विशेषतः। धारयेत् साधक श्रेष्ठस्त्रैलोक्यविजयी भवेत्।11।

त्रिलोहमध्यगं कृत्वा धारयेद् दक्षिणभुजे। शिखायामथवा कंठे सोऽपि सूर्य्यो न संशयः।12।

इति ते कथितं साम्ब त्रैलोक्ये मंगलाधिपम्। कवचं दुर्लभं लोके तव स्नेहात्प्रकाशितम्।13।

अज्ञात्वा कवचं दिव्यं यो जपेत्सूर्यमुत्तमम्। सिद्धिर्न जायते तस्य कल्पकोशितैरपि।14।



श्रीचन्द्र कवचम्- विनियोगः- ॐ अस्य श्रीचन्द्रकवचस्य गौतम ऋषिः, अनुष्टुप् छन्दः, श्रीचन्द्रो देवताः, श्रीचन्द्रप्रीत्यर्थे पाठे विनियोगः।

ऋष्यादिन्यास- श्रीगौतम ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। श्रीचन्द्र देवतायै नमः हृदि। श्रीचन्द्र प्रीत्यर्थे पाठे विनियोगाय नमः सर्वांगे।

ध्यानम्- समं चतुर्भुजं वन्दे केयूरमुकुटोज्जवलम्। वासुदेवस्य नयनं शंकरस्य च भूषणम्।।

कवचम्- शशी पातु शिरोदेशं भालं पातु कलानिधिः। चक्षुषी चन्द्रमा पातु श्रुति पातु निशापतिः।।

प्राणं क्षपाकरः पातु मुखं कुमुदबान्धवः। पातु कण्ठं च मे सोमः स्कन्धौ जैवातृकस्तथा।।

करौ सुधाकरः पातु वक्षः पातु निशाकरः। हृदयं पातु मे चन्द्रो नाभिं शंकरभूषणः।।

मध्यं पातु सुरश्रेष्ठः कटिं पातु मधुकरः। ऊरू तारापतिः पातु मृगांको जानुनी सदा।।

अब्धिजः पातु मे जंघे पातु पादौ विधुः सदा। सर्वाण्यन्यानि चांगानि पातु चन्द्रोऽखिलं वपुः।।

एतद्धि कवचं दिव्यं भुक्ति-मुक्ति प्रदायकम्। यः पठेच्छृणुयाद् वापि सर्वत्र विजयी भवेत्।।

---

**श्रीमंगल कवचम्-** विनियोगः- ॐ अस्य श्रीअंगारक कवच स्तोत्र मंत्रस्य कश्यप ऋषिः, अनुष्टुप् छन्दः, अंगारको देवता, भौमप्रीत्यर्थे जपे विनियोगः।

ध्यानम्- रक्ताम्बरो रक्तवपुः किरीटि चतुर्भुजो मेषगमो गदाभृत। धरासुतः शक्तिधरश्च शूली सदा मम स्याद् वरदः प्रशान्तः।।

कवचम्- अंगारकः शिरोरक्षेन्मुखं वै धरणीसुतः। श्रवौ रक्ताम्बरः पातु नेत्रे मे रक्तलोचनः।।

नासां शक्तिधरः पातु मुखं मे रक्तलोचनः। भुजौ मे रक्तमाली च हस्तौ शक्तिधरस्तथा।।

वक्षः पातु वरांगश्च हृदयं पातु लोहितः। कटिं मे ग्रहराजश्च मुखं चैव धरासुतः।।

जानुजंघे कुजः पातु पादौ भक्तप्रियः सदा। सर्वाण्यन्यानि चांगानि रक्षेन्मे मेषवाहनः।।

य इदं कवचं दिव्यं सर्वशत्रुनिवारणम्। भूत प्रेत पिशाचानां नाशंन सर्वसिद्धिदम्।।

सर्वरोगहरं चैव सर्वसम्पत्प्रदं शुभम्। भुक्ति-मुक्तिप्रदं नृणां सर्वसौभाग्यवर्धनम्।। रोगबंधविमोक्षं च सत्यमेतन्न संशयः।।

---

**श्रीबुध कवचम्- विनियोगः-** ॐ अस्य श्रीबुधकवच स्तोत्र मंत्रस्य, कश्यप ऋषिः, अनुष्टुप् छन्दः, श्रीबुधो देवता, बुधपीड़ाशमनार्थ जपे विनियोगः।

**ध्यानम्-** बुधस्तु पुस्तकधरः कुंकुमस्य समद्युतिः। पीताम्बरधरः पातु पीतमाल्यानुलेपनः।।

**कवच-** कटिं च पातु मे सौम्यः शिरोदेशं बुधस्तथा। नेत्रे ज्ञानमयः पातु श्रोते पातु निशाप्रियः।।

घ्राणं गंधप्रियः पातु जिह्वां विद्याप्रदो मम। कण्ठं पातु विधोः पुत्रो भुजा पुस्तकभूषणः।।

वक्षः पातु वरांगश्च हृदयं रोहिणीसुतः। नाभिं पातु सुराराध्यो मध्यं पातु खगेश्वरः।।

जानुनी रोहिणेयंच पातु जंघेऽखिलप्रदः। पादौ मे बोधनः पातु पातु सौम्योऽखिलं वपुः।।

एतद्धि कवचं दिव्यं सर्वपापप्रणाशनम्। सर्वरोगप्रशमनं सर्वदुःख निवारणम्।।

आयुरारोग्यधनदे पुत्रपौत्रप्रवर्धनम्। यः पठेच्छृणुयाद्वापि सर्वत्र विजयी भवेत्।।

---

**श्रीबृहस्पति कवचम्- विनियोगः-** ॐ अस्य श्रीबृहस्पति कवचस्य ईश्वर ऋषिः, अनुष्टुप् छन्दः, देवगुरु श्रीबृहस्पतिः देवता, गं बीजं, श्रीं शक्तिः, क्लीं कीलकं, बृहस्पति पीड़ा शमनार्थे पाठे विनियोगः।

**ऋष्यादिन्यास-** श्रीईश्वर ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। श्रीबृहस्पति देवतायै नमः हृदि। गं बीजय नमः गुह्ये।

श्रीं शक्तये नमः पादयो। क्लीं कीलकाय नमः नाभौ। श्रीबृहस्पति पीड़ा शमनार्थे पाठे विनियोगाय नमः सर्वांगे।



षडंगन्यास- गां, गीं, गूं, गैं, गौं, गः।

ध्यानम्- अभीष्ट फलदं देवं सर्वज्ञं सुर पूजितम्। अक्षमालाधरं शान्तं प्रणमामि बृहस्पतिम्।।

कवचम्- बृहस्पतिः शिरः पातु ललाटं पातु मे गुरुः। कर्णो सुरगुरुः पातु नेत्रे मेऽभीष्टदायकः।।

जिह्वां पातु सुराचार्यो नासां मे वेदपारगः। मुखं मे पातु सर्वज्ञो कण्ठं मे देवता गुरुः।।

भुजावांगिरसः पातु करौ पातु शुभप्रदः। स्तनौ मे पातु वागीशः कुक्षिं मे शुभलक्षणः।।

नाभिं देवगुरुः पातु मध्यं पातु सुखप्रदः। कटिं पातु जगद्वन्द्यः ऊरू मे पातु वाक्पतिः।।

जानु जंघे सुराचार्यो पादौ विश्वात्मकस्तथा। अन्यानि यानि चांगानि रक्षेन् मे सर्वतोगुरुः।।

इत्येतत् कवचं दिव्यं त्रिसंध्यं यः पठेन्नरः। सर्वान् कामानवाप्नोति सर्वत्र विजयी भवेत्।।

**श्रीशुक्र कवचम्– विनियोगः–** ॐ अस्य श्रीशुक्र कवचस्य भरद्वाज ऋषिः, अनुष्टुप् छन्दः, श्रीशुक्रः देवता, श्रीशुक्र प्रीत्यर्थे पाठे विनियोगः।

**ऋष्यादिन्यास–** श्रीभरद्वाज ऋषये नमः शिरसि। अनुष्टुपे छन्दसे नमः मुखे। श्रीशुक्र देवतायै नमः हृदि। श्रीशुक्र प्रीत्यर्थे पाठे विनियोगाय नमः सर्वांगे।

**ध्यानम्–** मृणाल कुन्देन्दुपयोज सुप्रभं पीताम्बरं प्रसृतमक्षमालिनम्। समस्त शास्त्रार्थनिधिं महान्तं ध्यायेत् कविं वांछितमर्थ सिद्धये।।

**कवचम्–** शिरो मे भार्गवः पातु भालं पातु ग्रहाधिपः। नेत्रे दैत्यगुरुः पातु श्रोत्रे मे चन्दनद्युतिः।।

पातु मे नासिकां काव्यो वदनं दैत्यवन्दितः। जिह्वां मे चोशना पातु कण्ठं श्रीकण्ठ भक्तिमान्।।

भुजौ तेजानिधिः पातु कुक्षिं पातु मनोव्रजः। नाभिं भृगुसुतः पातु मध्यं पातु महीप्रियः।।

कटिं मे पातु विश्वात्मा ऊरू मे सुरपूजितः। जानु जाड्यहरः पातु जंघे ज्ञानवतां बरः।।

गुल्फौ गुणनिधिः पातु पातु पादौ वरां वरः। सर्वाण्यंगानि मे पातु स्वर्णमालापरिष्कृतः।

य इदं कवचं दिव्यं पठति श्रद्धयाऽन्वितः। न तस्य जायते पीड़ा भार्गवस्य प्रसादतः।।

---

**श्रीशनि वज्रपंजर कवचम्–** श्रीब्रह्मोवाच– श्रृणुध्वमृषयः सर्वे शनि पीड़ाहरं महत्। कवचं शनिराजस्य सौरेरिदमनुत्तमम्।। कवचं देवतावासं वज्र पंजर संज्ञकम्। शनैश्चर प्रीतीकरं सर्व सौभाग्य दायकम्।।

विनियोगः– ॐ अस्य श्रीशनैश्चर वज्रपंजर कवचस्य कश्यप ऋषिः, अनुष्टुप् छन्दः, श्रीशनैश्चरः देवता, श्रीशनैश्चर प्रीत्यर्थे पाठे विनियोगः।

ऋष्यादिन्यास– श्रीकश्यप ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। श्रीशनैश्चर दैवतायै नमः हृदि। श्रीशनैश्चर प्रीत्यर्थे पाठे विनियोगाय नमः सर्वांगे।

ध्यानम्– नीलाम्बरो नीलवपुः किरीटी गृध्रस्थितः त्रासकः धनुष्करो। चतुर्भुजः सूर्ययुतः प्रसन्नः सदा मम स्यात् वरदः प्रशान्तः।।

श्रीब्रह्मोवाच- श्रृणुध्वगृषय सर्वे शनिपीड़ाहरं महत्। कवचं शनिराजस्य सौरेरिद मनुत्तमम्।।

कवचं देवतावासं वज्रपंजर अंशकम्। शनैश्चर प्रीतिकरं सर्वसौभाग्यदायकम्।।

शिरः शनैश्चरः पातु भालं मे सूर्य नन्दनः। नेत्रे छायात्मजः पातु पातु कर्णौ यमानुजः।।

नासां वैवस्वतः पातु मुखं मे भास्करः सदा। स्निग्ध कण्ठश्च मे कण्ठं भुजौ पातु महाभुजः।।

स्कन्धौ पातु शनिश्चैव करौ पातु शुभप्रदः। वक्षः पातु यमभ्राता कुक्षिं पात्वसितस्तथा।।

नाभिं ग्रह पतिः पातु मन्दः पातु कटिं तथा। ऊरू ममान्तकः पातु यमो जानु युगं तथा।।

पादौ मन्द गतिः पातु सर्वांगं पातु पिप्पलः। अंगोपांगानि सर्वाणि रक्षेत् मे सूर्यनन्दनः।।

इत्येतत् कवचं दिव्यं पठेत् सूर्यसुतस्य यः। न तस्य जायते पीडा प्रीतो भवति सूर्यजः।।

व्यय जन्म द्वितीयस्थो मृत्युस्थान गतोऽपि वा। कालस्थ गतो वाऽपि सुप्रीतस्तु सदा शनिः।।

अष्टमस्थे सूर्यसुते व्यये जन्म द्वितीयगे। कवचं पठतो नित्यं न पीडा जायते क्वचित्।।

इत्येतत् कवचं दिव्यं सौरेर्यन्निर्मितं पुरा। द्वादशाष्टम जन्मस्थ दोषान्नाशयते सदा। जन्मलग्नस्थितान् दोषान् सर्वान् नाशयते प्रभु।।11।

---

**श्रीराहु कवचम्- विनियोगः-** ॐ अस्य श्रीराहु कवचस्य चन्द्रमा ऋषिः, अनुष्टुप् छन्दः, श्रीराहुर्देवताः, रां बीजं, नमः शक्तिः, स्वाहा कीलकं, श्रीराहु प्रीत्यर्थे पाठे विनियोगः।

**ऋष्यादिन्यास-** श्रीचन्द्रमा ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। श्रीराहु दैवतायै नमः हृदि। रां बीजायं नमः गुह्ये। नमः शक्तये नमः पादयोः। स्वाहा कीलकाय नमः नाभौ। श्रीराहु प्रीत्यर्थे पाठे विनियोगाय नमः सर्वांगे।

**षडंगन्यास-** रां, रीं, रूं, रैं, रौं, रः।

ध्यानम्- प्रणमामि सदा राहुं शूर्पाकारं किरीटिनम्। सैंहिकेयं करालास्यं लोकानाभयंकरम्।।

कवचम्- नीलाम्बरः शिरं पातु ललाटं लोक वन्दितः। चक्षुषी पातु मे राहुः श्रोत्रे त्वर्द्धशरीरवान्।।

नासिकां मे धूम्रवर्णः शूलपाणिर्मुखं मम। जिह्वां मे सिंहिकासूनुः कण्ठं मे कंठिनांघ्रिकः।।

भुजंगेशो भुजौ पातु नील माल्याम्बरः करौ। पातु वक्षस्थलं मंत्री पातु कुक्षिं विधुन्तुदः।।

कटिं मे विकटः पातु ऊरु मे सुरपूजितः। स्वभानुर्जानुनी पातु जंघे मे पातु जाड्यहा।।

गुल्फौ ग्रहपतिः पातु पादौ मे भीषणाकृतिः। सर्वाण्यंगानि मे पातु नीलश्चन्दन भूषणः।

राहोरिदं कवचमृद्धिदं वस्तुदं यो भक्त्या।। पठत्यनुदिनं नियतः शुचिः सन्।

प्राप्नोति कीर्तिमतुलां श्रियमृद्धिमायुरारोग्यमात्मविजयं च हि तत् प्रसादात्।।

---

**श्रीकेतु कवचम्– विनियोगः–** ॐ अस्य श्रीकेतुकवचस्य त्र्यम्बक ऋषिः, अनुष्टुप् छन्दः, श्रीकेतुर्देवताः, श्रीकेतुप्रीत्यर्थे पाठे विनियोगः।

**ऋष्यादिन्यास–** श्रीत्र्यम्बक ऋषये नमः शिरसि। अनुष्टुप् छन्दसे नमः मुखे। श्रीकेतुर्देवतायै नमः हृदि। श्रीकेतुप्रीत्यर्थे पाठे विनियोगाय नमः सर्वांगे।

**ध्यानम्–** क्रूरं करालवदनं चित्रवर्णं किरीटिनम्। प्रणमामि सदा केतुं ध्वजाकारं ग्रहेश्वरम्।।

**कवचम्–** चित्रवर्णः शिरः पातु भालं धूम्र समद्युतिः। पातु नेत्रे पिंगलाक्षः श्रुति मे रक्त लोचनः।।

घ्राणं पातु सुवर्णाभश्चिबुकं सिंहिकासुतः। पातु कण्ठं च मे केतु स्कन्धौ पातु ग्रहाधिपः।।

हस्तौ पातु सुरश्रेष्ठः कुक्षिं पातु महाग्रहः। सिंहासनः कटिं पातु मध्यं पातु महाऽसुरः।।

ऊरू पातु महाशीर्षो जानुनी मेऽति कोपनः। पातु पादौ च मे क्रूरः सर्वांगं नरपिंगलः।।

इतिदं कवचं दिव्यं सर्वरोगविनाशनम्। शत्रु विनाशं भूतानां शमनं सर्व सिद्धिदम्।।

बहुना किमिहोक्तेन यद्यन्मनसि वर्तते। तत् सर्वं भवेत्तस्य कवचस्य च धारणात्।। यः पठेच्छृणुयाद्वापि सर्वत्र विजयी भवेत्।।



**श्रीनवग्रह कवचम्-** ॐ शिरो मे पातु मार्त्तण्डः कपालं रोहिणीपतिः। मुखमंगारकः पातु कण्ठं च शशिनन्दनः।।

बुद्धिं जीवः सदा पातु हृदयं भृगुनन्दनः। जठरं च शनि पातु जिह्वां मे दितिनन्दनः।।

पादौः केतु सदा पातु वाराः सर्वांगमेव च। तिथयोऽष्टौ दिशः पातु न क्षत्राणि वपुः सदा।।

अंशौ राशिः सदा पातु योगश्च स्थैर्यमेव च। सुचिरायुः सुखं पुत्रं युद्धे च विजयी भवेत्।।

रोगात् प्रमुच्यते रोगी बन्धो मुच्येत बन्धनात्। श्रियं च लभते नित्यमरिष्टिस्तस्य न जायते।।

यः करे धारयेन्नित्यं तस्य रिष्टिर्न जायते। पठनात् कवचस्यास्य सर्व पापात् प्रमुच्यते।।

मृतवत्सां च या नारी काकवन्ध्या च या भवेत्। जीववत्सा पुत्रवती भवत्येव न संशयः।। एतां रक्षां पठेद् यस्तु अंगं स्पृष्ट्वाऽपि वा पठेत्।



---

**नवग्रह नमस्कार मंत्र-** ग्रहाणामादिरादित्यो लोकलक्षणकारकः। विषमस्थानसंभूतां पीड़ा दहतु मे रवि।1।

रोहिणीशः सुधामूर्तिः सुधागान्नो सुधाशनः। विषमस्थानसंभूतां पीडां दहतु मे विधुः।2।

भूमिपुत्रो महातेजा जगतो भयकृत्सदा। वृष्टिकृद्-वृष्टिहर्ता च पीड़ा दहतु मे कुजः।3।

उत्पातरूपी जगतां चन्द्रपुत्रो महाद्युतिः। सूर्यप्रियकरो विद्वान पीडां दहतु मे बुधः।4।

देवमंत्री विशालाक्षः सदा लोकहितेरतः। अनेकशिष्यैः सम्पूर्णः पीडां दहतु मे गुरुः।5।

दैत्यमंत्री गुरुस्तेषां प्राणदश्च महाद्युति। प्रभुस्ताराग्रहणां च पीडां दहतु मे भृगुः।6।

सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः। मन्दचारः प्रसन्नात्मा पीडां दहतु मे शनिः।7।

महाशीर्षो महावक्त्रो महादंष्ट्रो महायशः। अनुश्चोर्ध्व-केशश्च पीडां दहतु मे तमः।8।

अनेकरूपवर्णश्च शतशोऽथ सहस्रशः। उत्पातरूपी घोरश्च पीडां दहतु मे शिखीः।9।

---

## ।नवग्रह मंत्र।।

सूर्य अष्टाक्षर मंत्र- 'ॐ घृणिः सूर्य आदित्य।'

सूर्य दशाक्षर मंत्र- 'ॐ ह्रीं घृणिः सूर्य आदित्य श्रीं।'

चन्द्र षडक्षर मंत्र- 'ॐ स्वौं सोमाय नमः।'

चन्द्र दशाक्षर मंत्र- 'ॐ श्रीं श्रीं श्रूं सों सोमाय नमः।'

भौम अष्टाक्षर मंत्र- 'ॐ अंगारकाय नमः।'

भौम दशाक्षर मंत्र- 'ॐ क्रां क्रीं क्रौं सः भौमाय नमः।'

बुध सप्ताक्षर मंत्र- 'ॐ बुं बुधाय नमः।'

बुध दशाक्षर मंत्र- 'ॐ ब्रां ब्रीं ब्रूं सः बुधाय नमः।'

बृहस्पति अष्टाक्षर मंत्र- 'ब्रूं बृहस्पतये नमः।'

बृहस्पति दशाक्षर मंत्र- 'ॐ ग्रां ग्रीं ग्रौं सः गुरुवे नमः।'

शुक्र सप्ताक्षर मंत्र- 'ॐ शुं शुक्राय नमः।'

शुक्र दशाक्षर मंत्र- 'ॐ द्रां द्रीं द्रौं सः शुक्राय नमः।'

शनि अष्टाक्षर मंत्र- 'ॐ शनैश्चराय नम।'

शनि दशाक्षर मंत्र- 'ॐ प्रां प्रीं प्रौं सः शनये नमः।'

राहु षडक्षर मंत्र- 'रां राहवे नमः।'

राहु सप्ताक्षर मंत्र- 'ॐ रां राहवे नमः।'

केतु सप्ताक्षर मंत्र- 'ॐ कें केतवे नमः।'

केतु दशाक्षर मंत्र- 'ॐ प्रां प्रीं प्रौं कं केतवे स्वाहा।'

---

## ।।नवग्रह गायत्री मंत्र।।

सूर्य- 'ॐ आदित्याय विद्महे प्रभाकराय धीमहि तन्नः सूर्य प्रचोदयात्।'

चन्द्र- 'ॐ क्षीरपुत्राय विद्महे अमृततत्त्वाय धीमहि तन्नश्चन्द्रः प्रचोदयात्।'

मंगल- 'ॐ अंगारकाय विद्महे शक्तिहस्ताय धीमहि तन्नः भौमः प्रचोदयात्।'

बुध- 'ॐ सौम्यरूपाय विद्महे वाणेशाय धीमहि तन्नौ सौम्यः प्रचोदयात्।'

गुरु- 'ॐ अंगिरसाय विद्महे दिव्यदेहाय धीमहि तन्नौ जीवः प्रचोदयात्।'

शुक्र- 'ॐ भृगुराजाय विद्महे दिव्यदेहाय धीमहि तन्नो शुक्रः प्रचोदयात्।'



शनि- 'ॐ भगभवाय विद्महे मृत्युरूपाय धीमहि तन्नो शनिः प्रचोदयात्।

राहु- 'ॐ शिरोरूपाय विद्महे अमृतेशाय धीमहि तन्नो राहुः प्रचोदयात्।'

केतु- 'ॐ पद्मपुत्राय विद्महे अमृतेशाय धीमहि तन्नो केतुः प्रचोदयात्।'

---

## ।।नवग्रह मातृका मंत्र।।

सूर्यादि ग्रहों की पिंगलादि नौ माताएं प्रसिद्ध हैं। जिनकी पूजा करने से ग्रहों का दुष्प्रभाव समाप्त हो जाता है।

मंगला पिंगला धान्या भ्रामरी भद्रिका तथा।

उल्का सिद्धा संकटा च विकटा गर्भपालिका।।

सूर्य मातृका मंत्र- 'क्षें पिंगले वैरिवारणि प्रसीद फट्।'

चन्द्र मातृका मंत्र - 'ह्रीं मंगले मंगलालये स्वाहा।'

भौम मातृका मंत्र- 'क्ष्रीं भ्रामरी सपत्नान् मे अधीश्वरि भ्रामय क्लीं।'

बुध मातृका मंत्र- 'व्लं भद्रिके मम भद्रं देहि परभद्राणि नाशय-नाशय स्वाहा।'

गुरु मातृका मंत्र- 'श्रीं धनदे धान्ये स्वाहा।'

शुक्र मातृका मंत्र- 'ह्रीं सिद्धिदे सर्वं मम साधय-साधय नमः।'

शनि मातृका मंत्र- 'ऐं ह्रीं उल्कादेव्यै नमः।'

राहु मातृका मंत्र- 'ह्रीं संकटे रोगं मे परमं नाशय-नाशय।'

केतु मातृका मंत्र- 'ॐ नमः भगवति विकटे वीरपालिके प्रसीद-प्रसीद।'

---

## Books Written by Gurudev Shri Raj Verma ji

- Divya Mantra Sadhana Evam Siddhi




- Shri Baglamukhi Divya Sadhana




Shri Raj verma ji
09897507933, 07500292413